# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा – २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री | प्रश्नपत्रम् – ६ | गुणाः – ५० |
| विषयः – नव्यव्याकरणम् | सत्रम् – ६ (OLD) | समयः – १०:०० तः १२:०० |
| दिनाङ्कः – १९/०७/२०२१ | सन्दर्भग्रन्थः – परिभाषेन्दुशेखरः, वाक्यपदीयञ्च | |

सूचना - निम्नलिखितेषु दशसु प्रश्नेषु केचित् पञ्च प्रश्नाः विधेयाः।
प्रत्येकं प्रश्नस्य समानगुणाः। (१०)

**प्रश्नः १ त्रिषु द्वयोः उत्तरे लेख्ये।** **१०**

१ 'रकि ज्यः सम्प्रसारणम्' यथाग्रन्थं निरूपयत।

२ ऋकारलृकारयोः सवर्णविधिः।

३ 'ईषदर्थे क्रियायोगे' इति श्लोकवार्त्तिकं व्याख्येयम्।

**प्रश्नः २ 'दीधीवेवीटाम्' सूत्रस्य भाष्यानुसारम् अनावश्यकत्वं स्पष्टयत।** **१०**

**प्रश्नः ३ 'यङ्‌ग्क्क्यलोपे प्रतिषेधः' इति वार्त्तिकं सोदाहरणं व्याख्येयम्।** **१०**

**प्रश्नः ४ त्रिषु द्वयोः उत्तरे लेख्ये।** **१०**

१ 'निपात एकाजनाङ्' अत्र निपात इति किमर्थम् ? इत्याक्षेपं भाष्यानुसारं समाधायत।

२ 'अदसो मात्' सूत्रस्य भाष्यानुसारं व्याख्या विधेया।

३ 'मुखनासिकावचनोनुनासिकः' इति भाष्यानुसारं वर्णयत।

**प्रश्नः ५ 'ईदूदेद्द्विवचनम्' इति सूत्रं भाष्यानुसारं स्पष्टयत।** **१०**

**प्रश्नः ६ 'नामार्थस्य पञ्चकत्वं व्याख्येयम्'** **१०**

**प्रश्नः ७ त्रिषु द्वयोः उत्तरे लेख्ये।** **१०**

१ 'कारकमपि नामार्थः' इति ग्रन्थरीत्या प्रतिपादयत।

२ लिङ्गस्य नामार्थत्वं प्रतिपादनीयम्।

३ 'ग्राह्यत्वं ग्राहकत्वं च' इति कारिकायाः व्याख्यां लिखत।

**प्रश्नः ८ नामार्थविषये मीमांसकमतं प्रतिपादनीयम्।** १०

**प्रश्नः ९ नामार्थविषयकं वैयाकरणमतम्प्रतिपादनीयम्।** १०

**प्रश्नः १० निम्नलिखितेषु प्रश्नेषु दशनां प्रश्नानां लघूत्तरं देयम्।** १०

१ 'क्ङिति च' इति सूत्रं कयोः निषेधं शास्ति ?

२ तन्निमित्तग्रहणस्य भूयः प्रयोजनानि कानि ?

३ कस्य ङित्वात् आदेशेषु स्थानिवद्भावप्रसङ्गः?

४ दीधीवेव्यौ किं विषयकौ स्तः ?

५ दृष्टानुविधिः कुत्र भवति ?

६ 'ईदूदेत्' इत्यत्र तपराणां प्रगृह्यसंज्ञा किमर्थम् ?

७ प्लुतानां प्रगृह्यसंज्ञा कथं न प्राप्नोति ?

८ 'अदसो मात्' इति अस्य सूत्रस्य कार्यम् किम् अस्ति ?

९ 'शे' इति सूत्रेण कस्य किं भवति ?

१० एकम् = जातिः तस्या एव कथं वाच्यत्वौचित्यम् ?

११ अनुकरणशब्दाः कस्मान्न भिद्यन्ते ?

१२ किन्नाम नपुसंकत्वम् ?

१३ पदार्थपदे किम् ? वा कः धर्मः ?

१४ व्यक्तिपदे किम् ? वा कः धर्मः ?

१५ अनदः अदः अभवत् इत्यस्य रूपं किम्।

****